# महाभाष्यप्रदीपप्रकाशव्याख्यानस्य द्वितीयाह्निकात् पञ्चमाह्निकं यावत् समीक्षात्मकमध्ययनम्

(mahābhāṣyapradīpaprakāśavyākhyānasya dvitīyāhnikāt pañcamāhnikaṃ yāvat samīkṣātmakamadhyayanam)

A review of dvitīyāhnika to pañcamāhnika of mahābhāṣyapradīpaprakāśavyākhyā

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतविभागे पि-एच्-डि (PhD)
इत्युपाधिप्राप्तये समर्प्यमाणो शोधप्रबन्धः


**अनुसन्धाता - राजकुमारमण्डलः**
अनुक्रमाङ्कः - B2050005
शोधच्छात्रः, संस्कृतदर्शनविभागे
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

**मार्गदर्शकः - डाँ. गोपीकृष्णन्-रघुः**
सहायकाचार्यः,संस्कृतदर्शनविभागस्य
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य



रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः, हावडा, पश्चिमवङ्गः - ७११२०२
शिक्षावर्षम् – २०२०-२५

# महाभाष्यप्रदीपप्रकाशव्याख्यानस्य द्वितीयाह्निकात् पञ्चमाह्निकं यावत् समीक्षात्मकमध्ययनम्

## (A review of dvitīyāhnika to pañcamāhnika of mahābhāṣyapradīpaprakāśavyākhyā)


**शोधसारः**

पाणिनीयसूत्राणामुपरि महर्षिणा पतञ्जलिना योत्कृष्टा व्यवहारोपयोगिनी व्याख्या विरचिता सा संस्कृतवाङ्मये 'महाभाष्यम्' इति नाम्ना प्रथितम्। महाभाष्यं न केवलं पाणिनिव्याकरणस्यैव महत्त्वाधायकं वर्तत अपि तु समग्रस्य संस्कृतवाङ्मयस्य अत्यद्भुतं प्रामाणिकमेव ग्रन्थरत्नमिदम्। समुद्रस्यान्तः यावद्गम्यते तावदेव रत्नप्राप्तिर्जायते। एवमेव समुद्रोपमस्य महाभाष्यस्यान्तः यावद्धि निमज्जनं तावद्धि ज्ञानोपमरत्नस्य लाभो भवति। महाभाष्ये अन्तर्निहितविद्यायाः प्राप्तिस्तावट्टीकाग्रन्थेष्वन्तर्निहितविद्याया उन्मोचनेनैव सेत्स्यति। महाभाष्यमाधारीकृत्य विरचितासु नैकासु टीकासु प्रदीपनाम्नी टीका हि प्रसिद्धतमा वर्तते। प्रदीपमाश्रित्याऽपि रचितासु नैकासु टीकास्वन्यतमा हि प्रवर्तकोपाध्यायेन विरचिता महाभाष्यप्रदीपप्रकाशनाम्नी टीका। अस्याः टीकायाः द्वितीयाह्निकात् पञ्चमाह्निकं यावत् समीक्षात्मकाध्ययनमूलकेन मदीयेन शोधप्रबन्धेन महाभाष्यग्रन्थस्य अंशविशेषेऽन्तर्निहितविद्यायाः लाभाय प्रयत्नो विहितः। अर्थात् महाभाष्यस्य द्वितीयात् पञ्चमाह्निकं यावत् प्रवर्तकोपाध्यायस्य व्याख्याने विशेषस्थलस्याऽन्वेषणमत्र प्रयतितम्।

पाठकानां कृते मूलग्रन्थस्य अवगमनमनायासेन यथा स्यादित्येव प्राथमिकं प्रयोजनमभिसन्धाय टीकाकाराणां ग्रन्थप्रणयणे प्रवृत्तिर्भवतिः। ततः मार्गेऽस्मिन् प्रवृत्तस्य टीकाकर्तुः इतरटीकाऽपेक्षया वैलक्षण्यप्रतिपादनमपि स्ववैदुष्यज्ञापनस्य द्वारं भवति। इतरटीकाऽपेक्षया एकस्याः टीकायाः वैलक्षण्यं बहुधा भवितुमर्हति। मूलग्रन्थस्य मतानां खण्डनपरकतया व्याख्यानद्वारा टीकायाः वैलक्षण्यं सेत्स्यति। अथ च मूलग्रन्थस्य खण्डनं विनैव नूतनशैल्या व्याख्यानद्वारा टीकायाः वैलक्षण्यं भवितुमर्हति। महाभाष्यप्रदीपप्रकाशटीकायाः वैलक्षण्यस्यान्वेषणमपि शोधप्रबन्धस्यास्य लक्ष्यभूतं वर्तते।

शोधप्रबन्धेऽस्मिन् उपक्रमोपसंहाराभ्यां पञ्च अध्यायाः वर्तन्ते। उपक्रमे महाभाष्यप्रदीपप्रकाशग्रन्थस्य परिचयार्थं ग्रन्थाभिधानघटकभूतयोः महाभाष्यप्रदीपयोः सामान्यपरिचयः, तदनु महाभाष्यप्रदीपप्रकाशग्रन्थस्य परिचयः, तदनु च टीकाकर्तुः कालनिर्णयः इत्येते विषयाः प्रस्तुताः। द्वितीयमाह्निकमाश्रित्य प्रवर्तमाने प्रथमेऽध्याये महाभाष्यप्रदीपप्रकाशमाश्रित्य प्रत्याहारसूत्राणि व्याख्यातानि। अत्र अइउण्, ॠऌक् इति सूत्रयोः प्रकाशे विशेषव्याख्यानमुपलब्धम्। तदनु तृतीयमाह्निकमाश्रित्य शोधप्रबन्धस्य द्वितीयोऽध्यायः सज्जीकृतः। अत्र वृद्धिरादैच्, इको गुणवृद्धी इति सूत्रयोः विशदं व्याख्यानं प्रकाशे कृतं वर्तते। चतुर्थमाह्निकमाश्रित्य प्रवृत्ते तृतीयेऽध्याये चतुर्थाह्निकस्य सूत्राणि प्रकाशग्रन्थदिशा स्पष्टीकृतानि। अत्र न धातुलोप आर्धधातुके, हलोऽनन्तराः संयोगः, नाज्झलौ इति सूत्रेषु प्रकाशे विशेषः परिलक्षितः। पञ्चममाह्निकमाधारीकृत्य सज्जीकृते चतुर्थेऽध्याये पञ्चमाह्निकस्य सूत्राणि प्रकाशग्रन्थाधारेण निरूपितानि। अत्र नैकेषु सूत्रेषु प्रकाशे विशेषव्याख्यानमुपलब्धम्। निष्कर्षः इत्याख्ये पञ्चमेऽध्याये आदौ प्रकाशटीकायाः विषये मदीक्षणं प्रस्तुतम्। अत्र प्रकाशटीकायाः स्वरूपम्, शैली, भाषा इत्यादयो विषयाः निरूपिताः। तदनु द्वितीयात् पञ्चमाह्निकं यावत् प्रकाशटीकायाः विशेषांशाः प्रस्तुताः। उपसंहारे अध्यायस्य संक्षिप्तिः प्रदर्शिता। परिशिष्टे सूचीत्रयं प्रदत्तम् – सूत्रसूची, श्लोकसूची, परिशीलितग्रन्थसूची चेति।